प्रमादस्तुलसीमाला श्रोतृभ्यश्चाथ दीयताम् ।
स्वदङ्गतालललितं कीर्त्तनं कीर्त्तनां ततः ॥
जयशब्दो नमःशब्दः शङ्खशब्दश्च गीयताम् ।
विप्रेभ्यो याचकेभ्यश्च वित्तमन्नञ्च दीयताम् ॥
विरक्तश्चेद्भवेत् श्रोता गीता वाच्या परेऽहनि ।
रहस्यश्चेत्तदा होमः कर्त्तव्यः कर्म्मशान्तये ॥
प्रतिश्लोकञ्च जुहुयाद्विधिना दशमस्य च ।
पायसं दधि सर्पिश्च तिलादिमधुसंयुतम् ॥
अथवा हवनं कुर्य्याद्गायत्र्या सुसमाहितः ।
तन्मयत्वात् पुराणस्य परमस्यास्य तत्त्वतः ॥
होमाशक्तौ बुधो होम्यं दद्यात्तत्फलसिद्धये ।
नानाच्छिद्रनिरोधार्थं न्यूनताधिक्यताख्ययोः ॥
दोषयोः प्रशमार्थन्तु पठेन्नामसहस्रकम् ।
तेन स्यात् सफलं सर्व्वं नास्त्यस्मादधिकं यतः ॥
द्वादश ब्राह्मणान् पश्चाद्भोजयेन्मधुपायसैः ।
दद्यात् सुवर्णं धेनुञ्च व्रतपूर्णत्वसिद्धये ॥
शक्तौ पलत्रयमितं स्वर्णसिंहं विधाय च ।
तत्रास्य पुस्तकं स्थाप्य लिखितं ललिताक्षरम् ॥
संपूज्यावाहनाद्यैस्तदुपचारैः सदक्षिणम् ।
वस्त्रभूषणगन्धाद्यैः पूजिताय यतात्मने ॥
आचार्य्याय सुधीर्दत्त्वा मुक्तः स्याद्भवबन्धनैः ।
एवं कृते विधाने च सर्व्वपापनिवारणे ।
फलदं स्यात् पुराणन्तु श्रीमद्भागवतं शुभम् ॥
धर्म्मार्थकाममोक्षाणां साधनं नात्रसंशयः ।
इति ते कथितं सर्व्वं किं भूयः श्रोतुमिच्छसि ॥
श्रीमद्भागवतेनैव भक्तिमुक्तिः प्रकाशिता ॥”
इति पाद्मोत्तरखण्डे श्रीभागवतमाहात्म्ये ६ अध्यायः ॥

पारायणिकः, पुं, (पारायणं वर्त्तयतीति । पारायण + “पारायणतुरायणेति ।” ५ । १ । ७२ । इति ठञ् ।) पाठकः । छात्रः । इति सिद्धान्तकौमुदी ॥

पारारुकः, पुं, (पॄ पूर्त्तौ + घञ् । पारं पूर्त्तिं ऋच्छतीति । ऋ गतौ + उकञ् ।) प्रस्तरः । इति शब्दरत्नावली ॥

पारावतः, पुं, (पारे गिरिदुर्गनद्यादिपरपारे आपततीति । पार + आ + पत + अच् । पृषोदरादित्वात् पस्य वः । उड्डीयने सुदक्षत्वादेवास्य तथात्वम् । यद्वा, परावद्दूरदेशस्तस्मिन् अन्तरीक्षादिदूरदेशे भवः उड्डीयमानः सन् स्थित इत्यर्थः । परावत् + अण् ।) पक्षिविशेषः । पायरा इति भाषा ॥ तत्पर्य्यायः । छेदकण्ठः २ कपोतः ३ रक्तलोचनः ४ । इति रभसः ॥ पारापतः ५ कलरवः ६ अरुणलोचनः ७ मदनकाकुरवः ८ कामी ९ रक्तेक्षणः १० मदनमोहनवाग्विलासी ११ कण्ठीरवः १२ गृहकपोतकः १३ ॥ (यथा,—
“सिंहो बली द्विरदकुञ्जरमांसभोजी
संवत्सरेण कुरुते रतिमेकवारम् ।
पारावतः खलु शिलाकणमात्रभोजी
कामी भवेदनुदिनं वद कोऽत्र हेतुः ॥”
इत्युद्भटः ॥)
अस्य मांसगुणाः । स्निग्धत्वम् । मधुरत्वम् । गुरुत्वम् । शीतलत्वम् । पित्तास्रदाहनाशित्वम् । बल्यत्वम् । वीर्य्यवृद्धिदातृत्वम् । इति राजनिर्घण्टः ॥ रसे पाके स्वादुत्वम् । कषायत्वम् । विशदत्वञ्च । इति राजवल्लभः ॥ तद्भेदो यथा,—
“पारावतोऽन्यो वङ्गदेशी कामुको बुलबुलारवः ।
पारावताङ्घ्रिपिच्छश्च ज्ञेयो गलरवश्च सः ॥”
इति राजनिर्घण्टः ॥
मर्कटः । तिन्दुकः । इति मेदिनी । ते, २१२ ॥ गिरिः । इति हेमचन्द्रः ॥ (नागविशेषः । यथा, महाभारते । १ । ५७ । ११ ।
“पारावतः पारिजातः पाण्डरो हरिणः कृशः ।
विहङ्गः शरभो मेदः प्रमोदः संहतापनः ।
ऐरावतकुलादेते प्रविष्टा हव्यवाहनम् ॥”
अम्लवर्गाणामन्यतमः । यथा, सुश्रुते । १ । ४२ ।
“दाडिमामलकमातुलुङ्गाम्रातककपित्थकरमर्द्दबदरकोलप्राचीनामलकतिन्तिडीककोशाम्रभव्यपारावतवेत्रफललकुचाम्लवेतसदन्तशठतक्रसुराशुक्तसौवीरकतुषोदकधान्याम्लप्रभृतीनि समासेनाम्लो वर्गः ॥” * ॥ परात् शत्रोरहङ्कारात् अवति रक्षतीति । अव रक्षणे + शतृ । ततः पारावते इदमिति । तस्येदमित्यण् । दत्तात्रेयस्य गुरुः । इति चिन्तामणिः ॥)

पारावतपदी, स्त्री, (पारावतस्येव पादो मूलं यस्याः । ङीष् । पद्भावः ।) पारावताङ्घ्रिः । नयाफट्की इति भाषा ॥ इति रत्नमाला ॥ काकजङ्घा । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सितस्थाने । ९ अध्याये ।
“पारावतपदीदन्तीवाकुचीकेशराह्वयैः ।
कण्टकार्य्या च तत् पक्वं घृतं कुष्ठिषु योजयेत् ॥”)

पारावताङ्घ्रिः, स्त्री, (पारावतस्य अङ्घ्रिरिव अङ्घ्रिर्मूलं यस्याः ।) ज्योतिष्मती । इत्यमरः । २ । ४ । १५० ॥

पारावताङ्घ्रिपिच्छः, पुं, (पारावताङ्घ्रिरिव पिच्छः पश्चात्प्रदेशो यस्य ।) वङ्गदेशीयपारावतः । इति राजनिर्घण्टः ॥

पारावती, स्त्री,(पारावतस्येव ध्वनिरस्त्यस्या इति । अच् । ततो ङीष् ।) गोपगीतम् । नदीभेदः । (यथा, हारीते प्रथमस्थाने ७ अध्याये ।
“तथा चर्म्मण्वती वेत्रवती पारावती तथा ॥”)
लवलीफलम् । इति मेदिनी । ते, २१२ ॥

पारावारं, क्ली, (पारं नद्यादिपरपारं आवृणोतीति । आ + वृ + “कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् ।) तटद्वयम् । इति मेदिनी । रे, २८१ ॥

पारावारः, पुं, (पारावारं तटद्वयं पारं अवारञ्च वा अस्त्यस्येति । अच् ।) समुद्रः । इत्यमरः । १ । १० । १ ॥ (यथा, देवीभागवते । १ । ५ । ५९ ।
“यदल्पं कीलालं कलयितुमशक्तः स तु नरः
कथं पारावाराकलनचतुरः स्याद्गतमतिः ॥”)

पारावारीणः, त्रि, (पारावारं गच्छतीति । पारावार + “राष्ट्रावारपाराद्घखौ ।” ४ । २ । ९३ । इत्यत्र “अवारपारादिगृहीतादपि विपरीताच्चेति वक्तव्यम् ।” इति वार्त्तिकोक्त्या खः ।) पारावारे गच्छति यः । पारावारशब्दात् खीन्प्रत्ययनिष्पन्नः ॥

पाराशरं, क्ली, (पराशरेण कृतमिति । पराशर + अण् ।) पराशरोक्तभिक्षुसूत्रम् । इति पाराशरिशब्दटीकायां भरतः ॥ (उपपुराणविशेषः । इति पुराणम् ॥ घृतविशेषः । यथाह चक्रदत्तः ।
“यष्टीबलागुडूच्यल्पपञ्चमूलीतुलां पचेत् ।
शूर्पेऽपामष्टभागस्थे तत्र पात्रे पचेद्घृतम् ॥
धात्रीविदारीक्षुरसं त्रिपात्रे पयसोऽर्म्मके ।
सुपिष्टैर्जीवनीयैश्च पाराशरमिदं घृतम् ॥”)

पाराशरः, पुं, (पराशरस्यापत्यं पुमान् । पराशर + “ऋष्यन्धकेति ।” ४ । १ । ११४ । इत्यण् ।) व्यासदेवः । इति शब्दरत्नावली ॥ (पराशरकृतस्मृतिसंहिताविशेषः । यथा,—
“कृते तु मानवो धर्म्मस्त्रेतायां गौतमः स्मृतः ।
द्वापरे शङ्खलिखितः कलौ पाराशरः स्मृतः ॥”
अस्य विशेषविवरणन्तु पराशरशब्दे द्रष्टव्यम् ॥) पराशरसम्बन्धिनि, त्रि ॥

पाराशरकल्पिकः, पुं, (पाराशरः पराशरकृतः कल्पस्तं वेत्त्यधीते वा । “विद्यालक्षणकल्पान्ताच्चेति वक्तव्यम् ।” ४ । २ । ६० । इत्यस्य वार्त्तिकोक्त्या ठक् ।) पाराशरकल्पाध्यायी । पाराशरकल्पवेत्ता । इति सिद्धान्तकौमुदी ॥

पाराशरिः, पुं, (पराशरस्यापत्यम् । “अत इञ् ।” ४ । १ । ९५ । इतीञ् ।) वेदव्यासः । इति भूरिप्रयोगः ॥

पाराशरी, [न्] पुं, (पाराशर्य्येण प्रोक्तं भिक्षुमधीते इति । पाराशर्य्य + “पाराशर्य्यशिलालिभ्यां भिक्षुनटसूत्रयोः ।” ४ । ३ । ११० । इति णिनिः ।) मस्करी । चतुर्थाश्रमी । पराशरेण प्रोक्तं भिक्षुसूत्रं इत्यर्थे अणि पाराशरं तद्वियतेऽस्याध्ययनायेति नैकाजादिति इन् । इत्यमरभरतौ ॥

पाराशर्य्यः, पुं, (पराशरस्यापत्यम् । पराशर + “गर्गादिभ्यो यञ् ।” ४ । १ । १०५ । इति यञ् ।) व्यासः । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । १ । ४ । ३२ ।
“पाराशर्य्य ! महाभाग ! यत्त्वं पृच्छसि
मामिह ॥”)

पारिकाङ्क्षी, [न्] पुं, (पारमत्रास्तीति । इनिः । पारि ब्रह्मज्ञानं तत् काङ्क्षतीति । काङ्क्ष + णिनिः ।) तपस्वी । इत्यमरः । २ । ७ । ४२२ ॥ मस्करी । इति हेमचन्द्रः । ३ । ४७४ ॥

पारिजातः, पुं, (पारमस्यास्तीति पारी समुद्रस्तस्मात् जातः । समुद्रमन्थनकाले तद्गर्भजातत्वात् तथात्वम् । पारिणोऽद्रेर्जातः इति कश्चित् ।) पारिभद्रवृक्षः । सुरतरुः । इति मेदिनी । ते, २११ ॥ (समुद्रमन्थनकालेऽस्योत्पत्तिकथा यथा, भागवते । ८ । ८ । ६ ।